## कठचरकाल्लुक् । (१०७/१४८७)

कठचरकशब्दाभ्यां परस्य प्रोक्तप्रत्ययस्य लुग् भवति । [1]कठशब्दाद् वैशम्पायनान्तेवासिभ्यः (४.३.१०४/१४८४) इति [2]णिनेः, चरकशब्दादप्यणः । कठेन प्रोक्त[3]मधीयते [4]कठाः । चरकाः । छन्दसि इत्येव । काठाः । चारकाः[5] ॥

## कलापिनोऽण् । (१०८/१४८८)

कलापिशब्दादण् प्रत्ययो भवति तेन प्रोक्तम् इत्येतस्मिन् विषये । वैशम्पायनान्तेवासित्वाण् णिनेरपवादः । कलापिना प्रोक्तमधीयते कालापाः । 'इनण्यनपत्ये' (६.४.१६४/१२४५) इति प्रकृतिभावे [6]प्राप्ते,

[४६९] नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापि[7]कुथुमितैतलिजाजलिजाङ्गलि[8]लाङ्गलि[9]शिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसङ्ख्यानम् ।

इति टिलोपः । अथाण्ग्रहणं [10]किम्, [11]यथाप्राप्तमित्येव सिद्धम् ? अधिकविधानार्थ, तेन माथुरी वृत्तिः, सौलभानि ब्राह्मणानि इत्येवमादि सिद्धम्[12] ॥

## छगलिनो ढिनुक् । (१०९/१४८९)

छगलिन्शब्दात् ढिनुक् प्रत्ययो भवति तेन प्रोक्तम् इत्येतस्मिन् विषये । कलाप्यन्तेवासित्वाण् णिनेरपवादः । छगलिना प्रोक्तमधीयते [13]छागलेयिनः ॥

## पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः । (११०/१४९०)

णिनिरिहानुवर्तते, न ढिनुक् । पाराशर्यशिलालिभ्यां णिनिः प्रत्ययो भवति तेन प्रोक्तम् इत्येतस्मिन् विषये । भिक्षुनटसूत्रयोः इति यथासङ्ख्यं [14]प्रत्ययार्थविशेषणम् । सूत्रशब्दः प्रत्येकमभिसम्बध्यते । तद्विषयता चात्रेष्यते, तदर्थं छन्दोग्रहण[15]मनुवर्त्यं, गुणकल्पनया च भिक्षुनटसूत्रयोः छन्दस्त्वम् । पाराशर्येण प्रोक्तमधीयते पाराशरिणो भिक्षवः । शैलालिनो नटाः । भिक्षुनटसूत्रयोः इति किम् ? पाराशरम् । शैलालम् ॥

## कर्मन्दकृशाश्वादिनिः । (१११/१४९१)

भिक्षुनटसूत्रयोः इत्येव । कर्मन्दकृशाश्वशब्दाभ्याम् इनिः प्रत्ययो भवति तेन प्रोक्तम् इत्येतस्मिन् [16]विषये यथासङ्ख्यं भिक्षुनटसूत्रयोरभिधेययोः । अणोऽपवादः । [17]अत्रापि [18]तद्विषयतार्थं छन्दोग्रहण[19]मनुवर्त्यम् । कर्मन्देन प्रोक्तमधीयते कर्मन्दिनो भिक्षवः । कृशाश्विनो नटाः । भिक्षुनटसूत्रयोः इत्येव, कार्मन्दम् । कार्शाश्वम्[20] ॥

---

1. कठशब्दात् – अणः नास्ति फ. 2. णिनिः क. 3. वेदं इत्यधिकम् फ. 4. ये ते इत्यधिकम् क. 5. श्लोकाः इत्यधिकम् ब. क. ड. इ. फ. 6. प्राप्ते नास्ति फ. 7. कौथुमि ब. क. ड. 8. लाङ्गलि नास्ति क. 9. शलिलि क. 10. किमर्थम् फ. 11. न च इत्यधिकम् ब.ड.इ, न इत्यधिकम् ह. 12. भवति इत्यधिकम् ब. क.इ.फ.ह. 13. छगलेयिनः ब.ह. 14. प्रत्ययार्थे क. 15. अनुवर्तितव्यम् फ. 16. अर्थे क. 17. तत्रापि क. 18. तद्विषयार्थं ब.क. 19. अनुवर्तनीयम् फ. 20. इति इत्यधिकम् क.